पूर्व्वमुत्तरशृङ्गाणां अन्तरं मध्यमस्य च ।
त्रिविष्टपो नाकपृष्ठे ह्यप्सरा: सन्ति निर्वृता: ॥२४॥
आनन्दोऽथ प्रमोदश्च स्वर्गशृङ्गे तु मध्यमे ।
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ॥ २५ ॥
आह्लाद: स्वर्गराजा वै स्वर्गशृङ्गे तु पश्चिमे ।
निर्ममो निरहङ्कार: सौभाग्यश्चातिनिर्म्मल: ॥२६॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्व्वशृङ्गे समाश्रिता: ।
एकविंशति स्वर्गा वै निविष्टा मेरुमूर्द्धनि ॥२७॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तत्तेषु निवसन्ति स्म जना: क्रोधविवर्जिता: ॥२८॥
जलप्रवेशे चानन्दं प्रमोदं वह्निसाहसे ।
भृगुप्रपाते सौख्यं च रणं चैवास्य निर्मलम् ॥२९॥
अनाशके तु संन्यासे म्टतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृ-
तिम् ॥ ३० ॥
तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज: ।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतप:फलम् ॥३१॥
शीतकाले महावह्निं प्रज्वालयति यो नर: ।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोऽप्सरसं लभेत् ॥३२॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥३३॥
रौप्यदानेन स्वर्गं तु निर्मलं लभते नर: ।
अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥३४॥
द्विजेभ्यस्तर्पणं कृत्वा दत्वा वस्त्राणि भक्तित: ।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचति ॥३५॥
कपिलागोप्रदानेन परमार्थे महीयते ।
गोवृषस्य प्रदानेन स्वर्गं मन्मथमाप्नुयात् ॥३६॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानहदाता च स्वर्गं यात्युपशोभनम् ॥३७॥
देवतायतनं कृत्वा द्विजशुश्रूषकस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यश: ।
उपवासी त्रिरात्राद्यै: शान्त: स्वर्गं शुभं
लभेत् ॥ ३९ ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रत: ।
निर्मलं स्वर्गमाप्नोति यथाभूतहिते रत: ॥४०॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥४१॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानव: ।
चत्वारि अतिदानानि कन्या गौर्भू: सरस्वती ॥४२॥
नरकादुद्धरन्त्येते जपवाहनदोहनात् ।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्य: प्रय-
च्छति ॥ ४३ ॥
संप्राप्य न निवर्त्तेत स्वर्गं शान्तमनामयम् ।
शृङ्गे तु पश्चिमे यत्र ब्रह्मा तत्र स्थित: स्वयम् ॥४४॥
पूर्व्वशृङ्गे स्वयं विष्णु: मध्ये चैव शिव: स्थित: ।
अत: परं तु विप्रेन्द्र ! स्वर्गाध्वानमिमं शृणु ॥४५॥
विमलं विपुलं शुद्धसुपर्ण्णपरिसंस्थितम् ।
प्रथमे तु कुमारस्तु द्वितीये मातर: स्थिता: ॥४६॥
तृतीये सिद्धगन्धर्वा तुर्य्ये विद्याधरा द्विज !।
पञ्चमे नागराजा च षष्ठे तु विनतासुत: ॥४७॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे ।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥४८॥
भूर्लोकाच्छतसाहस्राद्दूर्द्ध्वं चरति भास्कर: ।
योजनानां सहस्रे द्वे विष्कम्भनसमं तत: ॥ ४९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणत: ।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्कर: ॥५०॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्कर: ।
तदा संयमने याम्ये तत्रोद्यंस्तु प्रदृश्यते ॥५१॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा ।
ध्रुवाधारस्तथोत्तिष्ठन् वालिखिल्यादिभि:
स्तुत: ॥ ५२ ॥
इति श्रीनरसिंहपुराणे भूवनकोषे त्रिंशो-
ऽध्याय: ॥ ३० ॥)

भुवन्यु:, पुं, (भवतीति । “कन्युच् क्षिपेश्च ।” उणा० ३ । ५१ । इति चकारात् भूधातोरपि कन्युच् ।) सूर्य्य: । वह्नि: । चन्द्र: । इति मेदिनी । ये, ६८ ॥ प्रभु: । इत्युणादिकोष: ॥

भुवर्लोक:, पुं, (भुवश्चासौ लोकश्चेति ।) भूरादिसप्तलोकान्तर्गतद्वितीयलोक: । यथा,—
“भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ॥”
इति विष्णुपुराणे । २ अंशे ७ अध्याय: ॥
(यथा च भागवते । २ । ५ । ८ ।
“भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य
नाभित: ।
हृदा स्वर्लोक उरसा महर्लोको महात्मन: ॥”)

भुव:, [स्] व्य, (भवतीति । भू+“भूरञ्जिभ्यां कित् ।” उणा० ४ । २१६ । इति असुन् स च कित् ।) आकाश: । इति हेमचन्द्र: ॥ (महाव्याहृतिभेद: । यथा, मनु: । २ । ७६ ।
“अकारञ्चाप्युकारञ्च मकारञ्च प्रजापति: ।
वेदत्रयान्निरदुहत् भूर्भुव: स्वरितीति च ॥”)

भुवि:, [स्] स्त्री, (भवतीति भवत्यस्मिन् रत्नादीनि वा । भू+“भुव: कित् ।” उणा० २ । ११३ । इति इसिन् । स च कित् ।) समुद्र: । इत्युणादिकोष: ॥

भू, सत्तायाम् । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) सत्तेह द्विविधा । उत्पत्तिर्विद्यमानता च । भवति मनुष्योऽपत्या विष्णु: । इति दुर्गादास: ॥

भू, क शुद्धिचिन्तयो: । मिश्रणे । इति कविकल्पद्रुम: । (चुरा०-पर०-सक०-सेट् ।) क, स्वबन्धावयति द्विष: सर्व्वान् । चयोऽर्या: । इति दुर्गादास: ॥

भू, क ङ प्राप्तौ । इति कविकल्पद्रुम: ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, भावयते । इति दुर्गादास: ॥

भू, ञ प्राप्तौ । इति कविकल्पद्रुम: । (भ्वा०-उभ०-सक०-सेट् ।) ञ, भवति भवते घनं धीर: । भवत्येव सत्तायां प्राप्तिसम्पन्नजन्मास्विति भट्टमल्ल: । भवते दुरितध्वयं यथोक्तक्रतुभिर्भावयते च नाकलोकमिति हलायुध: । केचिदस्यादात्मनेपदिनं मत्वा प्राप्तौ परस्मैपदं सत्तार्थस्यैवानेकार्थत्वात् समाधत्ते । इति दुर्गादास: ॥

भू, व्य,(भू+क्विप् ।) रसातलम् । इति हेमचन्द्र: ॥

भू:, स्त्री, (भवत्यस्मिन्निति । भू+अधिकरणे क्विप् ।) पृथिवी । इत्यमर: । २ । १ । २ ॥ (यथा, मनु: । ७ । ६ ।
“न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षि-
तुम् ॥”
यथा च वैद्यकरत्नमालायामस्या: पर्य्याय: ।
“भूर्भूमि: पृथिवी पृथ्वी मेदिनी वसुधावनि: ।
क्षितिरुर्व्वी मही क्षौणी क्ष्मा धरा कुर्वसु-
न्धरा ॥”)
स्थानमात्रम् । इति मेदिनी । भे, १ ॥ (यथा, भागवते । ६ । ४ । ३१ ।
“यच्छक्तयो वदतां वादिनां वै
विवादसंवादभुवो भवन्ति ॥”
यज्ञाग्नि: । इति जटाधर: ॥

भूकं, क्ली, (भवतीति । भू+“सृवृभूशुषिमुषिभ्य: कक् ।” उणा० ३ । ४१ । इति कक् ।) छिद्रम् । काल: । इति मेदिनी । के, ३० ॥

भूक:, पुं, (भू+कक् ।) अन्धकार: । इति शब्दमाला ॥

भूकदम्ब:, पुं, (भुवि कदम्ब इव।) अलम्बुषवृक्ष: । इति रत्नमाला ॥ कोकसीम । इति भाषा ॥

भूकदम्बक:, पुं, (भूकदम्ब+संज्ञायां कन् ।) यवानी । इति राजनिर्घण्ट: ॥ (विवृतिविशेषोऽस्य यवानीशब्दे ज्ञातव्य: ॥)

भूकन्द:, पुं, (भुव: पृथिव्या: कन्द इव ।) महाश्रावणिका । इति राजनिर्घण्ट: ॥ घुलकुड़ी । इति भाषा ॥

भूकम्प:, पुं. (भुव: पृथिव्या: कम्प: ।) भूमिकम्पनम् । स च अद्भुतविशेष: । यथा, अद्भुतसागरे ।
“मेषे वृश्चिकभे गज: प्रचलति व्यासादिभि:
कथ्यते
चापे मीनकुलीरभे च वृषभे संत्यं चलेत् कच्छप: ।
यूके कुम्भधरे मृगेन्द्रमिथुने कन्यान्तगे पन्नग-
स्तेषामेकतमो यदि प्रचलति क्षौणी तदा
कम्पते ॥
“कच्छपे मरणं ज्ञेयं मरकश्चापि पन्नगे ।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे ॥
प्रथितनरेश्वरमरणं व्यसनान्याग्नेयमारुतयो: ।
क्षुद्भयमतिवृष्टिभिरुपपीड्यन्ते जनाश्चापि ॥
त्रिचतुर्थपञ्चमदिने मासे पक्षे त्रिपक्षके ।
भवति यदा भूकम्प: प्रधाननृपनाशनं कुरुते ॥”
स च भूमिजोत्पातविशेष: । यथा,—
“चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ।
जलाशयानां वैकृत्यं भौमन्तदपि कीर्त्तितम् ॥
भौमं जाप्यफलं ज्ञेयं चिरेण परिपच्यते ।”
इति ज्योतिस्तत्त्वम् ॥

भूकर्व्वुदारक: पुं, वृक्षविशेष: । छोटालसोड़ा इति हिन्दी भाषा । तत्पर्य्याय: । सुदर्शेप्मा-